भोगिभिरद्भुतैः । रक्षोभिश्च पिशाचैश्च रौद्रैर्भूतगणैस्तथा राक्षसीभिश्च संपूर्णमनेकैश्च मृगद्विजैः ॥ सा तत्र सहसा गत्वा शैलपृष्ठं सुदुर्गमम् । प्राक्षिपत् काञ्चने कुण्डे शुक्रं सा त्वरिता शुभा ॥ शिष्टानामपि सा देवी सप्तर्षीणां महात्मनाम् । पत्नीस्वरूपकं कृत्वा कामयामास पावकम् ॥ दिव्यं रूपमरुन्धत्याः कर्त्तुं न शकितं तया । तस्यास्तपःप्रभावेन भर्त्तृशुश्रूषणेन च ॥ षट्कृत्वस्तत्र निक्षिप्तमग्नेरेतः कुरूत्तम ! । तस्मिन् कुण्डे प्रतिपदि कामिन्या स्वाहया तदा ॥ तत् स्कन्नं तेजसा तत्र संवृतं जनयत् सुतम् । ऋषिभिः पूजितं स्कन्नमनयत् स्कन्दतां ततः । षट्शिरा द्विगुणश्रोत्रो द्वादशाक्षिभुजक्रमः । एकग्रीवैकजठरः कुमारः समपद्यत ॥ वन० भा० स० २२३ अध्यायः

अग्निकुमारत्वेऽपि तस्य रुद्रकुमारत्वं तदप्युक्तं तत्रैव "ततो ब्रह्मा महासेनं प्रजापतिरथाब्रवीत् । अभिगच्छ महादेवं पितरं त्रिपुरार्द्दनम् ॥ रुद्रेणाग्निं समाविश्य स्वाहामाविश्य चोमया । हितार्थं सर्व्वलोकानां जातस्त्वमपराजित ! ॥ उमायोन्याञ्च रुद्रेण शुक्रं सिक्तं महात्मना अस्मिन् गिरौ निपतितं मिञ्जिकामिञ्जिकं ततः ॥ सम्भूतं लोहितोदे तु शुक्रशेषमवापतत् । सूर्य्यरश्मिषु चाप्यन्यदन्यच्चैवापतद्भुवि । आसक्तमन्यद्वृक्षेषु तदेवं पञ्चधापतत् ॥ इति २२४ अध्याये । अग्नितनयाग्निसुतादयोऽप्यत्र ।

**अग्निकेतु** पु० अग्नेः केतुरिव । धूमे तस्याग्निप्रभवत्वेन तच्चिह्नीभूतत्वम् गगने उद्धूयमानत्वात् तत्पताकत्वञ्च ।

**अग्निकोण** पु० अग्नेः अग्निदेवताकः कोणः अन्तरालदिक् ६त० । अग्निदैवत्ये पूर्व्वदक्षिणयोर्मध्ये दिग्भागे । "इन्द्रोवह्निः पितृपतिर्नैरृतोवरुणोमरुत् । कुवेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्युक्तेः तस्य पूर्व्वदक्षिणदिशोर्मध्यदिक्पतित्वम् । उपचारात् तत्स्वामिनोऽग्नेर्वाचका अपि अत्रैव । "प्रतिपत् नवमी पूर्व्वे रामरुद्रौ च पावके" इति ज्योतिषे "शक्रे हुताशे भयमिति" च अग्निकोणपरतया पावकादिशब्दः प्रयुक्तः ।

**अग्निगर्भ** पु० अग्निरिव जारको गर्भोऽस्य । अग्निजारवृक्षे । अग्निर्गर्भोऽस्य । सूर्य्यकान्तमणौ (आतसि) तस्य सूर्य्यकिरणसम्पर्कात् अग्न्युत्थापकत्वात्तथात्वम् । अग्निमन्थनकाष्ठरूपारणौ च । अग्निः स्थितो गर्भेऽस्याः । शमीलतायाम् स्त्री । "अग्निगर्भां शमीमिवेति" रघुः । शम्या गर्भेऽग्निस्थितिकथा भा० आनुशा० प० ८५ अध्याये "रुद्रस्य रेतःप्रस्कन्नमग्नौ निपतितञ्च यत् तत्तेजोऽग्निर्महद्भूतं द्वितीयमग्निमिव पावकम् । वधार्थं देवशत्रूणां गङ्गायां जनयिष्यतीति" ब्रह्मवाक्यानन्तरं कार्त्तिकेयोत्पत्त्यर्थमन्विमाणस्य कुतश्चित् कारणेन गुप्तस्याग्नेः "नष्टमात्मनि संलीनं नाधिजग्मुर्हुताशनमित्यनेन" देवैस्तस्यानासादने उक्ते नानास्थानेऽन्वेषणात् परिशेषे शमीगर्भे प्राप्तिरुक्ता, यथा "अश्वत्थान्निर्गतोवह्निः शमीगर्भमुपाविशदिति" । शमीगर्भे चास्य स्थितिं कथयतः शुकस्य जिह्वापरिवृत्तिरूपशापदानमुक्त्वा देवैस्तस्मै वरान् दत्त्वा शमीगर्भे बह्निरलक्ष्यत इत्युक्त्वा च "इत्युक्त्वा तं शमीगर्भे बह्निमालक्ष्य देवताः तदेवायतनं चक्रुः पुण्यं सर्व्वक्रियास्वपि । ततः प्रभृति चाग्निः स शमीगर्भेषु दृश्यते । उत्पादने तथोपायमधिजग्मुश्च मानवा" इति ।

अग्नेः सकाशात् गर्भोऽस्याः पृथिव्यां स्त्री । वह्निना गङ्गायामासिक्तगर्भस्य धारयितुमशक्यस्य पृथिव्यां सुमेरौ गङ्गया निक्षेपणमुक्तं तत्रैव । "सा वह्निना वार्य्यमाणा देवैरपि सरिद्वरा । समुत्ससर्ज तं गर्भं मेरौ गिरिवरे तदेति, उक्त्वा "तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः यद्द्रव्यं परिसंसृष्टं पृथिव्यां पर्व्वतेषु च तत् सर्वं काञ्चनीभूतं समन्तात् प्रत्यदृश्यत । पृथिवी च तदा देवी ख्याता वसुमतीति च स तु गर्भो महातेजाः गाङ्गेयः पावकोद्भवः दिव्यं शरवणं प्राप्य ववृधेऽद्भुतदर्शन इति भा० आनु० ८५ अ० । अतएव श्रुतौ "यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी" इत्युक्तम् । अग्निरिव गर्भोमध्यभागोऽस्याः । अग्निदीप्तायां महाज्योतिष्मतीलतायाम् स्त्री ।

**अग्निगृह** न० अग्निकार्य्यार्थं गृहं शा० त० । होमार्थे गृहे ६त० । श्रौतस्मार्त्ताग्निकृत्याधारे गृहे न । अग्न्यगारादयोऽप्यत्र । "वसंश्चतुर्थोऽग्निरिवाग्न्यगारे" इति रघुः ।

**अग्निग्रन्थ** पु० अग्निप्रतिपादकः ग्रन्थः शा० त० । अग्निहोमादि-प्रतिपादके शास्त्रे "अग्निग्रन्थपर्य्यन्तमधीते" सि० कौ० अग्निग्रन्थः अग्निप्रतिपादकः ग्रन्थ इति तत्त्वबो० । एवमेव मत्कृतसरलायामुक्तम् ।

**अग्निघृत** न० अग्न्युद्दीपनं घृतं शा० त० । वैद्यकोक्ते घृतभेदे यथा चक्रदत्तः ।

"पिप्पलीपिप्पलीमूलं चित्रको हस्तिपिप्पली । हिङ्गुचव्याऽजमोदा च पञ्चैव लवणानि च ॥ द्वौ क्षारौ हवुषा चैव दद्यादर्द्धपलोन्मितान् । दधिकाञ्जिकशुक्तानि स्नेहमात्रासमानि च । आर्द्रकं सरसं प्रस्थं घृतप्रस्थं विपाचयेदिति । एतदग्निघृतं नाम मन्दाग्नीनां प्रशस्यते इति" ॥